## ३४. विवाहात्परम्

पञ्चमी / आनीतवान्

माता - विवाहः समाप्तः अस्ति। इतःपरम् आनीतानि वस्तूनि ददातु जगदीश !

जगदीशः - अम्ब ! अहम् ओङ्कारनिलयतः कटान् आनीतवान्। हरिनिवासतः महाजलपात्रम् आनीतवान्। मधुकूपातः चषकान् आनीतवान्। एतत्सर्वमपि अद्य यानेन नेष्यामि।

माता - ध्वनिमुद्रिकाः च १५ ध्वनिमुद्रिकाः कुतः भवान् ?

जगदीशः - केशवनिलयतः ध्वनिमुद्रिकाः आनीतवान्। विस्मृतवान् आसम्। ताः अपि अद्य नेष्यामि।

माता - प्रतिनिवेशिनिगृहतः अहं स्थालिकाः आनीतवान् खलु। ताः स्थालिकाः अहं प्रत्यर्पयिष्यामि।

जगदीशः - अम्ब ! शङ्करमठतः अहं कलशम् आनीतवान् खलु। तस्मै ददातु।

माता - शिशिरस्य गृहतः भवान् आच्छादकानि आनीतवान् खलु। तानि अपि प्रेषयामि किम्?

जगदीशः - मास्तु, तानि वयमेव प्रत्यर्पयामः। अनुजं शिशिरगृहं प्रेषयतु।

माता - अस्तु भवान् सावधानं गच्छतु।